निवेदनम्

श्रीभगवतः अहैतुककरुणया प्रज्ञालोकपत्रिकायाः चतुर्दशाङ्कः प्राकाश्यमानीयते । द्वाविंशत्या प्रबन्धैः भ्राजमानेऽस्मिन्नङ्के रामकृष्णसङ्घस्य सहाध्यक्षचराणां परमपूज्यानां यतीश्वरानन्दस्वामिचरणानाम् अन्वर्थनामधेयानां लघुना केनचित् निबन्धेन देदीप्यते । आध्यात्मिकसाधनायां मानवसामान्येन अवश्यपालनीयाः चत्वारः नियमाः पूज्यपादैः अत्र विमृष्टाः ।

व्याकरणशास्त्रे वाक्यपदीयं क्रमेण अध्ययनाध्यापनपरम्परातः दूरमपास्यन् दरीदृश्यते । नहि सामान्येन ब्रह्मकाण्डातिरिक्तस्य ग्रन्थरत्नस्यास्य विशेषावधानं क्रियते । तत्र पदकाण्डे साधनसमुद्देशे करणाधिकारविषये विस्तृतं सुचिन्तितं लेखं प्रस्तुतवान् अभिजित्-दासः प्रशंसामर्हति । विशेषतः अस्य लेखस्य निष्कर्षः भाषातत्त्वक्षेत्रे विशिष्टमंशं विशदीकुरुते ।

भट्टोजीदीक्षितपादैः पञ्चम्यर्थविषये यदालोचितं तदत्र डॉ.नीरजकुमारभार्गवमहोदयैः सविस्तरमुपन्यस्तं प्रौढमनोरमा-शब्दकौस्तुभ-शब्दरत्न-ग्रन्थानां प्रकाशे । विषयः तथा शैली अतीव रोचकं नूनं वैयाकरणान् प्रसादयिष्यति । कर्मसंज्ञासूत्रे कर्तुरिति पदस्य प्रयोजनं प्राचीनैः अर्वाचीनैः च बहुभिः वैयाकरणैः सुतरां पर्यालोचितम् । तेषामेव विचाराणां रोचकशैल्या पुनर्व्यवस्थापनमत्र नयनचौधुरी-महोदयेन विहितम् ।

शानच्-प्रत्ययस्य अर्थनिरूपणविषये शब्दशास्त्रे बहुधा चर्चितम् । लघुमञ्जूषाग्रन्थे अस्मिन् विषये आचार्यनागेशेन विस्तरेण चर्चितम् । लघुमञ्जूषाया अध्ययनम् अद्यत्वे विरलम् । तत्र विचारितानां बिन्दूनां सम्यग् ज्ञानं पूर्वपक्षज्ञानमपेक्षते । प्रलय-नन्दिना शानजर्थविषये पूर्वपक्षाणां सप्रमाणमुपन्यासेन विषयेऽस्मिन् सुष्ठु चर्चा विहिता । वाक्यपदीये पदकाण्डे साधनसमुद्देशे कर्मणः विषये कृतानाम् उपदेशानां सरलरीत्या प्रतिपादनं कृतं मिलनमालिकेन । क्रियाविशेषणानां प्रयोगः सुमहान् भवति भाषायाम् । किन्तु शब्दशास्त्रे तद्विषये बहु न चर्चितम् । क्रियाविशेषणानां प्रयोगे किं लिङ्गं, किं वचनम् आश्रयणीयम् इत्यत्र शास्त्रप्रमाणं विरलतरम् । तस्मिन् विषये डॉ.सुखदेवभट्ट-महाभागेन शास्त्रानुगः प्रबन्धः प्रस्तुतः । शिवप्रसादशुक्लवर्यः तात्पर्याशास्त्रिकृत-भूतिटीकामाश्रित्य आन्तर्यविषये विशिष्टाः विचाराः उपन्यस्ताः ।

रघुवंशमहाकाव्यस्य प्रथमसर्गे बहुव्रीहिसमासानां प्रयोगे कीदृशं वैशिष्ट्यं भवति इति दर्शितं तुहिनमण्डलेन राकेशदाशेन च । तत्र प्रथमसर्गे ८५ बहुव्रीहिसमासाः दृश्यन्ते । तेषु केचन असमर्थसमासाः अपि सन्ति । एतत् सर्वं विस्तरेण विमृष्टम् अस्मिन् प्रबन्धे । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते' इति भगवद्गीतावचनस्य तात्पर्यमद्वैतवेदान्तदिशा किमस्ति इति लघुकायेन प्रबन्धेन विचारितवान् शुभदीपदासः । सिद्धान्तलेशसङ्ग्रहे श्रवणे नियमविधिः कथं प्रतिष्ठापितः इति वर्णयत् डॉ.पलाश-घोडइः । वैश्वदेवेन यजेत इत्यादिवाक्ये कर्मनामधेयार्थं किं निमित्तम् इति विशिष्य विचारितवान् राजेश-अधिकारी । अद्वैतवेदान्तस्य परम्परा अतीव प्राचीना । भगवत्पादशङ्करात् पूर्वम् अद्वैतवेदान्तस्य इतिहासः कथमासीदिति विवृणोति भजहरिदासः ।

ख्यातिः नाम भ्रमः । विविधदर्शनेषु ख्यातिविषये के सिद्धान्ताः समाश्रिताः इति विषये प्रीतमबेरा-सुखदेवभट्टाभ्यां सुपरामृष्टम् ।

प्रथमा-द्वितीयाविभक्त्योः अर्थवर्णनप्रसङ्गे व्याकरणग्रन्थेषु विस्तृतचर्चा दृष्टा एव । किन्तु पुराणेष्वपि एतादृशेषु विषयेषु चर्चा वर्तते इति अल्पविदितम् । अग्निपुराणे नारदपुराणे च प्रथमा-द्वितीया-विभक्त्योः अर्थविषये विस्तृतचर्चा दृश्यते । तं विचारमुपस्थापयति सुजित-कुमार-माइतिः ।

रसनिष्पत्तौ चतुर्णां पक्षाणां विषये विचारितवान् अमित-कुमार-गराइः । दशरूपकानुसारं भासस्य कर्णभारस्य विमर्शं कृतवान् शुभ-माजी-महोदयः ।

विश्वचेतना-विषये वेदोपनिषत्सु कृतान् विचारान् सङ्कलितवती अतसी-महापात्र-महाभागा । मनुष्यस्य आपराधिकप्रवृत्तिप्रसङ्गे फलितज्योतिषे कथं विचारितम् इति वर्णयति राधाकृष्ण-महोदयः । नीलाचलमिश्रमहोदयेन यक्षाधिपस्य कुबेरस्य वर्णनं कुत्र कथं वर्तते इति सुष्ठु वर्णयति ।

स्वामिविवेकानन्दः कथम् अद्वैतेन साकं सर्वाङ्गीणप्रेम्णः सङ्गमं घटयते इति वर्णयति दिव्येन्दुमण्डल-महोदयः । एवमेव स्वामिविवेकानन्दस्य मतेन सर्वजनीनधर्मेण एव साम्प्रदायिकमतभेदस्य निराकरणं शक्यम् ।

सर्वानपीमान् प्रबन्धकान् अभिनन्द्य प्रज्ञालोकस्य दीर्घमायुष्यं कामयामहे ।

सम्पादकाः